# ज्योतिषशास्त्रं मानवजीवनञ्च

डॉ. अरविन्द कुमार

भारतीयमनीषिण: विश्ववाङ्मयस्य प्रत्येकक्षेत्रे स्वसूक्ष्मातिसूक्ष्मचिन्तनस्य व्यापको परिचयो दत्तमस्ति। यत्र दर्शनस्य क्षेत्रे ध्वनिसिद्धान्त:, व्याकरणस्य क्षेत्रे भाषाया: विशुद्धार्थं शब्दानां निष्पत्ति:, संङ्गीतस्य क्षेत्रे सप्तस्वरा: तथा आयुर्वेदस्य क्षेत्रे नाडीविज्ञानं इत्यादीनां शिक्षा दत्ता। तत्रैव ते व्यवहारप्रवर्तनाय ज्योतिषशास्त्रस्य गणितं फलितं च पद्धितं जगतं प्रदायित्वा सर्वदा ग णी अभूत्। भारतीयानां चिन्तनस्य मूलाधार: वेदोऽस्ति। वेदा: धर्मेण सदाचारेण च सह कौटुम्बिक:, सामाजिक: वैज्ञानिक: एवञ्च दार्शनिक विचारधाराणां स्त्रोता आदि सन्ति। भारतीय विद्या: वेदेभ्य: प्रकटिता: सन्ति। षड्वेदाङ्गा वेदान् प्रकाशितकरणे स्व पृथक-पृथक योगदानं ददति। अतएव एतान् वेदस्य अङ्गो कथ्यते। अङ्ग्यन्ते प्रकाश्यन्ते वेदा: अनेन इति वेदाङ्गा:।

ज्योतिषशास्त्रस्य नेत्रसंज्ञा यज्ञयागादि अनुष्ठाय कालं प्रकाशित करणार्थमेव अस्ति। वेदस्य अन्याङ्गानामपेक्षया स्वविशिष्टयोग्यताया: कारणैव ज्योतिषशास्त्रं वेदभगवत: प्रधानोऽङ्ग: निर्मलचक्षु: अभवत्। अस्य अन्यकारणं एतदपि अस्ति यत् भविष्यजिज्ञासा सर्वासु युगेषु मनुष्यस्य मनसि सर्वदा प्रबला जाता। यस्य परिणति: इदं ज्योतिषशास्त्रमस्ति। कृषि-व्यापार-उद्योग-यज्ञ-सदाचार-धर्म-व्यवसाय तथा जीवनयात्राया: शुभकाल निर्णयार्थ ज्योतिषमेव एकमात्रसाधनमस्ति। कर्माणां क: काल: श्रेष्ठोऽस्ति? क: मुहूर्त: उत्तम: वर्तते? इमं व्याकरणशास्त्रादिभि: न ज्ञातुं शक्यते। मुहूर्तस्योपयोगिता यज्ञादिकर्मार्थं वर्तते। शुभं समयं ज्ञातु कालमानस्य ज्ञानं आवश्यकं भवति। कालोऽपि शुभाशुभमिश्रितो भवति यथा-सृष्टिनिर्माणे ब्रह्मा गुणदोषौ उभौ मेलयित्वा अर्थात् गुणदोषमयीसृष्टिं रचितवान्। तथैव कालोऽपि गुणदोषयुक्तो अस्ति। कोऽपि काल: न सर्वथा निर्दोष: नैव सर्वथा गुणवान्। यथोहि - आचार्य बृहस्पते: कथनं वर्तते -

**'स्वभावादेव कालोऽयं शुभाशुभ समन्वित:।**
**अनादिनिधन: सर्वो न निर्दोषो न निर्गुण:।।'**

एतादृशस्थितौ शुभाशुभसूक्ष्मकालस्य निर्धारणमावश्यकं भवति। भारतीयमनीषिण: आदिकालादेव लौकिक-पारलौकिक सुखप्राप्तये यज्ञानुष्ठानकरणं स्वपरमकर्त्तव्यं मन्यते। क: यज्ञ: कदा सम्पादितं भवेत्। अस्य ज्ञानं सूर्यस्य चन्द्रमसश्च गति: स्थिति: एवञ्च भिन्न-भिन्नतिथिषु नक्षत्रेषु च आधारिता आसीत्। यस्याभिव्यक्ति: कारणोऽस्ति यत् विशिष्ठाकवय: इमं शास्त्रं कालविधायक: शास्त्रं कथ्यते -

**'क्रतुकियार्थ श्रुतय: प्रवृत्ता: कालाश्रयास्ते कृतवो निरुक्ता:।**
**शास्त्रादमुष्मात्किल कालबोधो वेदाङ्गतामुष्य तत: प्रसिद्धा:।।'**

कालाधीनं जगत् सर्वम् 'प्राणिनां व्यावहारिकपारमार्थिक वा सर्वाणि कार्याणि कालाधीनं वर्तते। अथ च काल: ज्योतिषशास्त्राधीन: विद्यते। अत: ज्योतिषशास्त्रं लौकिकपारलौकिक सर्वेषां कार्याणां मुहूर्त: निर्धारणं करोति। तथा कालस्य गणनाया: विवेचनं प्रायश: सर्वेषु शास्त्रेषु मिलति। परञ्च ज्योतिषशास्त्रं कालस्य सम्यक् विवेचनाय तस्य पर्याय: एव जातम्।

ज्योतिष: मानवस्य परमहितैषी पथप्रदर्शक: अस्ति। स: एकसत्यमित्रस्य इव आपद्ग्रस्तमानवस्य दैहिक-दैविक-भौतिक विपत्ते: कारणान् ज्ञात्वा तं मानवं तेषां निवारणाय उपाय: निर्दिशति। प्रत्येक विज्ञानस्य आधार: जिज्ञासा वर्तते। तान् जिज्ञासान् उपशमनस्य एक: अद्वितीयो साधनोऽस्ति। 'ज्योतिषशास्त्रं मनुष्यस्य जन्मादारभ्य: मृत्युपर्यन्तं नैकजिज्ञासान् उत्कण्ठान् च स्वमनसि मस्तिष्के जन्म: ददाति। सदैव इमान् शान्तकरणस्य प्रयासेसंलग्नो भवति। ज्योतिषशास्त्रं मनुष्यस्य इमं स्वभावं जिज्ञासुप्रवृत्तिश्च शमनकरणस्य एकात्यन्तं महत्वपूर्णं साधनमस्ति।

**'वेदाहि यज्ञार्थमभिप्रवृत्ताः कालानि पूर्वाविहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं, यो ज्योतिषं वेद स वेद यज्ञम्।।'**

ज्योतिविज्ञानं भारतवर्षस्यैक: विशिष्टविकार: वर्तते। यस्य महत्त्वं पाश्चात्यपरम्परासु रीतिनामपि स्वीक्रियते। विदुसामनुसारेण येन प्रकारेण विज्ञानं स्वप्रयोगै: मानवीयजिज्ञासान् शमनं करोति। ज्यातिषशास्त्रं स्वज्ञानस्य असीमितसागरस्य तरङ्गै: सप्रमाणं पुष्टिं कृत्वा इमान् जिज्ञासान् शमनं करोति। एवं प्रकारेण कथयितुं शक्यते यत् ज्योतिषशास्त्रं वैदिकपरम्परागतज्ञानस्य आधुनिकतकनीकीज्ञानस्य च अपूर्वसम्मिश्रणं कृत्वा मानवस्य प्रकृतेश्च सेवायां निरतो वर्तते।

भारतीयवैदिकाध्ययनस्य यतानां आधारे ज्योतिशास्त्रं वैदिकविज्ञानमस्ति। ज्योतिषशास्त्रं वैदिकविज्ञानमस्ति। ज्योतिषशास्त्रं वेदाङ्गैषु एकोऽस्ति। अनेन तथ्येन ज्योतिषशास्त्रस्य ऐतिहासिकताया: प्रमाणो प्राप्यते -

**'शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।**
**ज्योतिषामयनमचेति वेदाङ्गानि षडैव तु।।'**

ज्योतिषशास्त्रं भारतीयविद्याया: महत्वपूर्ण अङ्गमस्ति। विशेषत: एकत: तु आचार्या: इमं ज्योतिशास्त्रं पराविद्याया: श्रेष्ठ्यां आनीतवन्त:। अपरत: वर्तमानसमये ज्योतिषशास्त्रं मानवजीवने महत्वपूर्णं स्थानं प्राप्तवान्। सर्वसाधारणस्य जीवने ज्योतिषशास्त्रं इमां सीमां पर्यन्तं व्याव्तमभवत्। यत् जन्मादारभ्य: मरणपर्यन्तस्य सर्वेषु संस्कारेषु वयं ज्योतिषशास्त्रस्य भिन्न-भिन्न स्वरूपै: साक्षात्कार: कुर्वन्ति।

वस्तुत: ज्योतिशास्त्रं मनुष्यस्य तान् स्वप्नान् पूर्णकरणस्य मार्गं सुगमनिर्माणस्य साधनमस्ति। यान् स: जीवनपर्यन्तं पूर्णकरणस्य प्रयतते। ज्योतिषशास्त्रस्य माध्यमेन मानव: अयं ज्ञातुं शक्यते यत् यस्य वर्तमान:

भविष्यश्च कीदृश: किं च भवितं शक्यते। ज्योतिषशास्त्रं मनुष्यं अनुमितिकरणे सहाय्यं करोति। येन यत् अयं निश्चितं कृत्वा यत् तं किं कर्त्तव्यम्? उत् च किं न?

ज्योतिषशास्त्रं वैदिकसंस्कृतकालात् एव प्रारम्भो अभवत्। अयमपि तावदेव प्रामाणिकं पुष्टशास्त्रं चास्ति। यावद् यत् विज्ञानम्। अथ तावदेव सहैव पौराणिक: यावद् वेद:। वस्तुत: ज्योतिषशास्त्रं एकमनुमानमस्ति य: मनुष्यं भविष्यस्य दर्शनं न कारयति अपितु तान् सम्भवान् समक्षं प्रकटयति। येषां तं आगामीजीवने प्रत्यक्षकरणं भवितुं शक्यते। ज्योतिशास्त्रं मनुष्यस्य मार्गदर्शकोभूत्वां तं तै: सम्भावनाभि: अवगतं कारयति। यान् स: स्वकर्मेषु परिवर्त्य स्वभविष्यं वर्तमानञ्च अपि सफली कर्त्तु शक्यते। मनुष्यस्य अन्वेषकस्वभाव: तं ज्योतिषेन युनक्ति। किन्तु मनुष्य: अयमवगन्तुं न शक्यते। यत् इयं एका केवला प्रेरणा, एकमनुमानमस्ति। यं स: स्व सत्यासत्यकर्माणां फलीभूत एव प्राप्तु शक्यते।

भारतीयज्योतिषं यदि एकस्यां पंक्तौ व्यक्तीक्रियते तर्हि अयमेव कथयितुं शक्यते यत् 'चिरन्तनेन जीवनेन च सम्बद्ध: सत्यस्य विश्लेषणकरणमेव अस्य शास्त्रस्य आभ्यान्तरिक: मर्मोऽस्ति'। संसारस्य समस्त्रशास्त्रं जगत: प्रत्येकांशस्य निरुपणं कुर्वन्ति। परञ्च ज्योतिष: आन्तरिक-ब्राह्यश्च संसारेण सम्बद्ध: समस्तज्ञेयानां प्रतिपादनं करोति। अस्य सत्यं 'दर्शन' वत जीवनेन ईश्वरेण च सम्बद्ध: नास्ति। किन्तु तस्मादग्रभाग: अस्ति। दार्शनिका: निरंशपरमाणुं मत्वा स्वचर्चाया: तत्रैव अन्त: कृतवान् परञ्च ज्योतिर्विदा: इमं निंशमपि गणितद्वारा सारांशरूपेण सिद्धं कृत्वा स्वसूक्ष्मताया: परिचयं दत्तम् -

वेदचक्षु: किलेदं स्मृतं ज्योतिषं मुख्यतया चाङ्गमध्येऽस्य तेनोच्यते। संयुतोऽपीतरै: कर्णनासादिभिश्चक्षुपाङ्गेन हीनो न किञ्चित् कर:।

यद्यपि ज्योतिशास्त्रं सत्य-जीवन-संसारेण च सम्बद्धमस्ति। किन्तु अतीन्द्रियो अस्ति। ज्योतिष: एतादृश: आध्यात्मिक शास्त्रोऽस्ति। यस्मिन् दर्शनशास्त्र-विज्ञानशास्त्र-गणितशास्त्र-भौगोलिक-खगोलिकी इत्यादीनि सर्वाणि शास्त्राणि समाहिता: भवन्ति। इमं विश्वस्य अपितु ब्रह्माण्डस्य मात्रमेव पूर्णशास्त्रस्य स्वरूपं प्रदानं कुर्वन्ति।

**सन्दर्भ सूची -**

1. सिद्धान्त शिरोमणि (वाल्मिकी रामायण)
2. ऋग्वेद (पाणिनीय शिक्षा)
3. सिद्धान्तशिरोमणि
4. बृहत्पाराशरहोराशास्त्र

***व्याख्याता***

*श्री रामजीलाल स्मृति शिक्षा महाविद्यालय*

*पंवालिया, सांगानेर, जयपुर (राज.)*